# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रिप्रथमवर्षम् (SEM-2) **प्रश्नपत्रम् –** ०५ **गुणा: -** ७०

**विषय: -** साहित्यम् **कोड – C.**C. **1.2.3** **समय: -** ११ त: ०२

**( NEW / OLD )**

**दिनाङ्क: -** १५/०४/२०१९ **सन्दर्भग्रन्थः –** साहित्यदर्पण: (तृतीय परिच्छेद:)

---

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ प्रदत्तासु कारिकासु द्वे कारिके साध्ये |** १०

१. सत्वोद्रेकादखण्डस्वप्रकाशावन्दचिन्मय: ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर:॥

२. नानाकार्यवशाद् यस्या दूरदेशं गत: पति: ।
सा मनोभवदु:खार्ता भवेत्प्रौषितभर्तृका ॥

३. मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्त: ।
सोऽयमनूढभ्राता राज्ञ: श्याल: शकार इत्युक्त: ॥

प्रश्नः – २ कमप्येकं प्रश्नं यथाधीतं विशदयत । १०

१. सात्त्विकनायकगुणान् सभेदपुर:सरं विशदयत ।

(अथवा)

२. नायकभेदान् ग्रन्थकारोक्तदिशा विवेचयत ।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ यथाभिमते द्वे कारिके साध्ये |** १०

(१)भूषणामर्धरचना मिथ्या विष्वगवेक्षणम्।
रहस्याख्यानमीषच्च्य विक्षेपो दयितान्तिके ॥

(२)विशेषादाभिमुख्येन चरणाद् व्यभिचारिण: ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदा: ॥

(३) सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत् ।
स्मृति: पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥

प्रश्नः – ४ यथेच्छं द्वयोरेक: प्रश्न: साध्य: । १०

१. नायिकालङ्कारा: भेदपुर:सरं व्याख्येया: ।

(अथवा)

स्थायिभावानां परिचय: देय: ।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५ केचन द्वे कारिके संसाध्ये ।** १०

१) श्रवणाद्दर्शनाद्वापि मिथ: संरूढरागयो: ।
यथाविशेषो योऽप्राप्तौ पूर्वराग: स उच्यते ॥

२) न चातिशोभते यन्नावैति प्रेम मनोगतम् ।
तन्नीलीरागमाख्यातं यथा श्रीरामसीतयो: ॥

३) सञ्चारिण: प्रधानानि देवादिविषया रति:।
उद्बुद्धमात्र: स्थायी च भाव इत्यभिधीयते ॥

प्रश्नः –६ कश्चिदेक: प्रश्न: साध्य: । १०

१. हास्यरसनिरूपणं सभेदं सोदाहरणञ्च विविच्यताम् ।

(अथवा)

रसानां पारस्परिकविरोधं – तदुपशमनञ्च विशदयत ।

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत ।** १०

१) तृतीयपरिच्छेदे कति कारिका: सन्ति ?

२) क: रस: कुन्देन्दुसुन्दरच्छाय: ?

३) विदूषकस्य किं लक्षणम् ?

४) दूतस्य कति प्रकारा: के च ते ?

५) विप्रलम्भस्य कति भेदा: ?

६) रौद्ररसस्य वर्ण: क: ?

७) वाचिकानां स्वभावजा: अलङ्कारा: कति ?

८) व्यभिचारिण: भावा: कति ?

९) बीभत्सरसस्य दैवत: क: ?

१०) प्रतिनायकस्य किं लक्षणम् ?

११) करुणरसस्य स्थायिभाव: क: ?

१२) पूर्वरागहेतुक: कतिविध: ?

१३) कस्य रसस्य दैवत: महेन्द्र: ?

१४) तृतीय परिच्छेदे प्रतिपाद्य: विषय: क: ?

१५) विभावस्य किं लक्षणम् ?

*****************